श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ त्रयोदशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रयोदशः सर्गः ॥

## रावणेन निर्मापिते शयनागारे कुम्भकर्णस्य शयनं रावणस्यात्याचारः कुबेरेण दूतं प्रेष्य तस्य प्रबोधनं क्रुद्धेन रावणेन दूतस्य वधश्च

अथ लोकेश्वरोत्सृष्टा तत्र कालेन केनचित्।
निद्रा समभवत् तीव्रा कुम्भकर्णस्य रूपिणी ॥ **7.13.1** ॥

ततो भ्रातरमासीनं कुम्भकर्णोऽब्रवीद् वचः।
निद्रा मां बाधते राजन् कारयस्व ममालयम् ॥ **7.13.2** ॥

विनियुक्तास्ततो राज्ञा शिल्पिनो विश्वकर्मवत्।
विस्तीर्णं योजनं स्निग्धं ततो द्विगुणमायतम् ॥ **7.13.3** ॥

दर्शनीयं निराबाधं कुम्भकर्णस्य चक्रिरे।
स्फाटिकैः काञ्चनैश्चित्रैः स्तम्भैः सर्वत्र शोभितम् ॥ **7.13.4** ॥

वैदूर्यकृतसोपानं किङ्किणीजालकं तथा।
दान्ततोरणविन्यस्तं वज्रस्फटिकवेदिकम् ॥ **7.13.5** ॥

मनोहरं सर्वसुखं कारयामास राक्षसः।
सर्वत्र सुखदं नित्यं मेरोः पुण्यां गुहामिव ॥ **7.13.6** ॥

तत्र निद्रां समाविष्टः कुम्भकर्णो महाबलः।
बहून्यब्दसहस्राणि शयानो न च बुध्यते ॥ **7.13.7** ॥

निद्राभिभूते तु तदा कुम्भकर्णे दशाननः।
देवर्षियक्षगन्धर्वान् सञ्जघ्ने हि निरङ्कुशः॥ **7.13.8** ॥

उद्यानानि विचित्राणि नन्दनादीनि यानि च।
तानि गत्वा सुसङ्क्रुद्धो भिनत्ति स्म दशाननः॥ **7.13.9** ॥

नदीं गज इव क्रीडन् वृक्षान् वायुरिव क्षिपन्।
नगान् वज्र इवोत्सृष्टो विध्वंसयति राक्षसः॥ **7.13.10** ॥

तथावृत्तं तु विज्ञाय दशग्रीवं धनेश्वरः।
कुलानुरूपं धर्मज्ञो वृत्तं संस्मृत्य चात्मनः॥ **7.13.11** ॥

सौभ्रात्रदर्शनार्थं तु दूतं वैश्रवणस्तदा।
लङ्कां सम्प्रेषयामास दशग्रीवस्य वै हितम्॥ **7.13.12** ॥

स गत्वा नगरीं लङ्कामाससाद विभीषणम्।
मानितस्तेन धर्मेण पृष्टश्चागमनं प्रति॥ **7.13.13** ॥

पृष्ट्वा च कुशलं राज्ञो ज्ञातीनां च विभीषणः।
सभायां दर्शयामास तमासीनं दशाननम्॥ **7.13.14** ॥

स दृष्ट्वा तत्र राजानं दीप्यमानं स्वतेजसा।
जयेति वाचा सम्पूज्य तूष्णीं समभिवर्तत॥ **7.13.15** ॥

स तत्रोत्तमपर्यङ्के वरास्तरणशोभिते।
उपविष्टं दशग्रीवं दूतो वाक्यमथाब्रवीत्॥ **7.13.16** ॥

राजन् वदामि ते सर्वं भ्राता तव यदब्रवीत्।
उभयोः सदृशं वीर वृत्तस्य च कुलस्य च॥ **7.13.17** ॥

साधु पर्याप्तमेतावत् कृत्यश्चारित्रसङ्ग्रहः।
साधु धर्मे व्यवस्थानं क्रियतां यदि शक्यते॥ **7.13.18** ॥

दृष्टं मे नन्दनं भग्नमृषयो निहताः श्रुताः।
देवतानां समुद्योगस्त्वत्तो राजन् मया श्रुतः॥ **7.13.19** ॥

निराकृतश्च बहुशस्त्वयाहं राक्षसाधिप।
सापराधोऽपि बालो हि रक्षितव्यः स्वबान्धवैः॥ **7.13.20** ॥

अहं तु हिमवत्पृष्ठं गतो धर्ममुपासितुम्।
रौद्रं व्रतं समास्थाय नियतो नियतेन्द्रियः॥ **7.13.21** ॥

तत्र देवो मया दृष्ट उमया सहितः प्रभुः।
सव्यं चक्षुर्मया दैवात् तत्र देव्यां निपातितम्॥ **7.13.22** ॥

का न्वेषेति महाराज न खल्वन्येन हेतुना।
रूपं चानुपमं कृत्वा रुद्राणी तत्र तिष्ठति॥ **7.13.23** ॥

देव्या दिव्यप्रभावेण दग्धं सव्यं ममेक्षणम्।
रेणुध्वस्तामिव ज्योतिः पिङ्गलत्वमुपागतम्॥ **7.13.24** ॥

ततोऽहमन्यद् विस्तीर्णं गत्वा तस्य गिरेस्तटम्।
तूष्णीं वर्षशतान्यष्टौ समधारं महाव्रतम्॥ **7.13.25** ॥

समाप्ते नियमे तस्मिंस्तत्र देवो महेश्वरः।
ततः प्रीतेन मनसा प्राह वाक्यमिदं प्रभुः॥ **7.13.26** ॥

प्रीतोऽस्मि तव धर्मज्ञ तपसानेन सुव्रत।
मया चैतद् व्रतं चीर्णं त्वया चैव धनाधिप॥ **7.13.27** ॥

तृतीयः पुरुषो नास्ति यश्चरेद् व्रतमीदृशम्।
व्रतं सुदुष्करं ह्येतन्मयैवोत्पादितं पुरा॥ **7.13.28** ॥

तत्सखित्वं मया सौम्य रोचयस्व धनेश्वर।
तपसा निर्जितश्चैव सखा भव ममानघ॥ **7.13.29** ॥

देव्या दग्धं प्रभावेण यच्च सव्यं तवेक्षणम्।
पैङ्गल्यं यदवाप्तं हि देव्या रूपनिरीक्षणात्॥ **7.13.30** ॥

एकाक्षपिङ्गलीत्येव नाम स्थास्यति शाश्वतम्।
एवं तेन सखित्वं च प्राप्यानुज्ञां च शङ्करात्॥ **7.13.31** ॥

आगतेन मया चैवं श्रुतस्ते पापनिश्चयः।
तदधर्मिष्ठसंयोगान्निवर्त कुलदूषणात्॥ **7.13.32** ॥

चिन्त्यते हि वधोपायः सर्षिसङ्घैः सुरैस्तव।
एवमुक्तो दशग्रीवः कोपसंरक्तलोचनः॥ **7.13.33** ॥

हस्तान् दन्तांश्च सम्पिष्य वाक्यमेतदुवाच ह।
विज्ञातं ते मया दूत वाक्यं यत् त्वं प्रभाषसे॥ **7.13.34** ॥

नैव त्वमसि नैवासौ भ्रात्रा येनासि चोदितः।
हितं नैष ममैतद्धि ब्रवीति धनरक्षकः॥ **7.13.35** ॥

महेश्वरसखित्वं तु मूढः श्रावयते किल।
नैवेदं क्षमणीयं मे यदेतद् भाषितं त्वया॥ **7.13.36** ॥

यदेतावन्मया कालं दूत तस्य तु मर्षितम्।
न हन्तव्यो गुरुर्ज्येष्ठो मयायमिति मन्यते॥ **7.13.37** ॥

तस्य त्विदानीं श्रुत्वा मे वाक्यमेषा कृता मतिः।
त्रीन् लोकानपि जेष्यामि बाहुवीर्यमुपाश्रितः॥ **7.13.38** ॥

एतन्मुहूर्तमेवाहं तस्यैकस्य तु वै कृते।
चतुरो लोकपालांस्तान् नयिष्यामि यमक्षयम्॥ **7.13.39** ॥

एवमुक्त्वा तु लङ्केशो दूतं खड्गेन जघ्निवान्।
ददौ भक्षयितुं ह्येनं राक्षसानां दुरात्मनाम्॥ **7.13.40** ॥

ततः कृतस्वस्त्ययनो रथमारुह्य रावणः।
त्रैलोक्यविजयाकाङ्क्षी ययौ यत्र धनेश्वरः॥ **7.13.41** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्रयोदशः सर्गः॥